धर्म्मपत्नी । यथा, विष्णुपुराणे ।१।१५।१०५।
"अरुन्धती वसुर्यामी लम्बा भानुमरुत्वती ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च
ता दश ॥")

यामुनं, क्ली, (यमुनायां भवम् । यमुना + अण् । यमुनाया इदमित्यण् वा ।) स्रोतोऽञ्जनम् । इत्यमरः । २।६।१०० ॥ (अस्य पर्य्यायो यथा,—
"अञ्जनं यामुनञ्चापि कापोताञ्जनमित्यपि ।
तत्तु स्रोतोऽञ्जनं कृष्णं सौवीरं श्वेतमीरितम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पुं, जनपदभेदः । यथा, भागवते । १।१०।३४ ।
"कुरुजाङ्गलपाञ्चालान् शूरसेनान् स यामुनान् ।
ब्रह्मावर्त्तं कुरुक्षेत्रं मत्स्यान् सारस्वतानथ ॥"
पर्व्वतविशेषः । यथा, रामायणे । ४।४०।२१ ।
"कालिन्दीं यमुनां रम्यां यामुनञ्च महा-
गिरिम् ।"
तीर्थभेदः । यथा, महाभारते । ३ । ८४ । ४९ ।
"यमुनाप्रभवं गत्वा समुपस्पृश्य यामुनम् ।
अश्वमेधफलं लब्ध्वा स्वर्गलोके महीयते ॥")
यमुनासम्बन्धिनि, त्रि । (यथा, प्रायश्चित्ततत्त्वे ।
"त्रिभिः सारस्वतं तोयं सप्तभिस्तथ यामुनम् ।
नार्म्मदं दशभिर्मासैर्गाङ्गं वर्षेण जीर्य्यति ॥")

यामुनेष्टकं, क्ली, (यामुनमिवेष्टकम् ।) सीसकम् । इति जटाधरः ॥ (विशेषोऽस्य सीसकशब्दे विज्ञेयः ॥)

यामेयः, पुं, भागिनेयः । यामिः स्वसृकुलस्त्रियो-रित्यनुशासनात् यामेरपत्यमित्यर्थे ढेय-(ढक्) प्रत्ययनिष्पन्नः ॥ (याम्या धर्म्मपत्न्या अपत्य-मिति । यामिपुत्त्रः । यथा, भागवते । ६।६।६ ।
"ककुदः सङ्कटस्तस्य कीकटस्तनयो यतः ।
भुवो दुर्गाणि यामेयः स्वर्गो नन्दिस्ततोऽभवत् ॥")

याम्यः, पुं, (यामी दिगावासोऽस्य । यामी + यत् ।) अगस्त्यमुनिः । चन्दनद्रुमः । इति मेदिनी । ये, ४८ ॥ (यमस्यायमिति । यम + ण्यः । यमदूतः । यथा, मार्कण्डेये । ११ । ३० ।
"कृष्यमाणस्य याम्यैश्च नरकेषु च पात्यतः ।
पुनश्च गर्भो जन्माथ मरणं नरकस्तथा ॥")

याम्या, स्त्री, (यमस्येयं यमो देवतास्या इति वा । यम + "यमाच्चेति वक्तव्यम् ।" ४।१।८५ । इति वार्त्तिकोक्त्या ण्यः । टाप् ।) दक्षिणदिक् । (यथा, रामायणे । २ । १०३ । २६ ।
"प्रगृह्य तु महीपालो जलपूरितमञ्जलिम् ।
दिशं याम्यामभिमुखो रुदन् वचनमब्रवीत् ॥")
भरणीनक्षत्रम् । इति मेदिनी । ये, ४८ ॥
(यमसम्बन्धिनि, त्रि । यथा, महाभारते ।२।८।१।
"कथयिष्ये सभां याम्यां युधिष्ठिर ! निबोध ताम् ।
वैवस्वतस्य यां पार्थ ! विश्वकर्म्मा चकार ह ॥")

याम्यायनं, क्ली, (याम्यायामयनं याम्यं अयन-मिति वा ।) दक्षिणायनम् । यथा, मलमासतत्त्वे ।
"याम्यायने हरौ सुप्ते सर्व्वकर्म्माणि वर्ज्जयेत् ॥"

याम्योद्भूतः, पुं, (याम्यायामुद्भूतः ।) शीतालद्रुमः । इति राजनिर्घण्टः ॥

यायजूकः, पुं, (पुनः पुनर्यजति । यज् + यङ् । "यजजपदशां यङः ।" ३ । २ । १६६ । इति ऊकः ।) पुनःपुनर्यागकर्त्ता । तत्पर्य्यायः । इज्याशीलः । इत्यमरः । २ । ७ । ८ ॥ (यथा, रामायणे । २ । ७२ । १५ ।
"या गतिः सर्व्वभूतानां तां गतिं ते पिता गतः ।
राजा महात्मा तेजस्वी यायजूकः सतां गतिः ॥")

यायावरः, पुं, (पुनःपुनरतिशयेन वा याति देशा-द्देशान्तरं गच्छतीति । या + यङ् । "यश्च यङः ।" ३।२।१७६। इति वरच् ।) अश्वमेधीयाश्वः । इति जटाधरः ॥ जरत्कारुमुनिः । इति त्रिकाण्ड-शेषः ॥ (ऋषीणां गणविशेषः । यथा, महा-भारते । १२ । २४३ । १७ ।
"तात प्रव्रज्य धर्म्मार्थास्तथा यायावरा गताः ॥"
जरत्कारुमुनिरेवैतद्वंशीयः । यथा, महाभारते । १ । १३ । ११ ।
"जरत्कारुरिति ख्यात ऊर्द्ध्वरेता महातपाः ।
यायावराणां प्रवरो धर्म्मज्ञः संशितव्रतः ॥")
त्रि, पुनःपुनर्गमनशीलः । यथा,—
"यायावराः पुष्पफलेन चान्ये
प्राणैर्भुरर्थ्यां जगदर्च्चनीयम् ॥"
इति भट्टिः । २ । २० ॥
(स्त्री, यावृत्ता । यथा, भागवते ।७।११।१६ ।
"वार्त्ता विचित्रा शालीनयायावरशिलोञ्छनम् ।
विप्रवृत्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा ॥"
"यायावरं प्रत्यहं धान्ययाच्ञा ।" इति तत्र श्रीधरस्वामी ॥)

यावः, पुं, (यौति यूयते वा । यु + अण् अप् वा । ततः प्रज्ञाद्यण् ।) अलक्तः । इत्यमरः । २ । ६ । १२५ ॥ (तथास्य पर्य्यायः ।
"लाक्षा पलङ्कषालक्तो यावो द्रुमामयो जतु ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
यथा, नैषधे । २२ । ४६ ।
"ततस्तदीयाधरयावयोगा-
दुदेति बिम्बारुणबिम्ब एषः ॥"
यव एव । स्वार्थेऽण् । यावः । यथा, तैत्तिरीय-संहितायाम् । ४ । ३ । ६ । २ ।
"यावानां भागोऽस्य यावानामाधिपत्यमिति ॥")

यावकः, पुं, (यव एव यावः स इवेति इवार्थे कन् । यद्वा, याव एव । याव + "यावादिभ्यः कन् ।" ५ । ४ । २९ । इति स्वार्थे कन् ।) कुल्माषः । इत्यमरः । २ । ९ । १९ ॥ "द्वे घोरोऽन्नाद्ये । कुत्स्य इत्यन्ये माषाकृतिपक्वे काश्मीरेषु गुन-सीति ख्याते । इति सुभूतिः ॥ यव इव गुणेन इति यवकः विकारसंघेति कः । यवक एव यावकः स्वार्थे ष्णः । कुत्सेन मस्यति परिणमति कुल्माषः मसीयं इं परिमाणे परीणामे घञ् मनीषादित्वादलुक् । कुल्माषो दन्त्यसकारवान् मूर्द्धन्यषकारवांश्च । कुल्मासो रभसश्चेति दन्त्यान्ते रचित इति मधुः ॥ कुल्माषो यावके पुंसि काञ्जिके तु नपुंसकमिति मूर्द्धन्यान्ते रभसः ।" इति भरतः ॥
"यवकः स्यात्तु कुल्माषः कुल्मासो यावकोऽपि च ।
घोरवाक्ये षष्टिके वा कुल्मे काश्मीरदेशजे ।
शालिधान्येषु चत्वार इति केचित् प्रचक्षते ॥"
इति शब्दरत्नावली ॥ * ॥
यावान्नम् । इति हेमचन्द्रः ॥ (यथा, मनौ ।११। १२६ ।
"सङ्करापात्रकृत्यासु मासं शोधनमैन्दवम् ।
मलिनी करणीयेषु तप्तः स्याद्यावकैस्त्र्यहम् ॥")
अलक्तकः । इति शब्दरत्नावली ॥ (यथा, किराते । ५ । ३९ ।
"इह सनियमयोः सुरापगायाः
मुषसि सयावकसव्यपादलेखा ।
कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु ॥")

यावज्जीवं, व्य, क्ली, (यावत् जीवतीति । जीव + "यावति विन्दजीवोः ।" ३ । ४ । ३० । इति णमुल् ।) यावदायुः । जीवनपर्य्यन्तम् । यथा,
"यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता ।
माता च मम वन्ध्यासीदपुत्त्रश्च पिता मम ॥"
इति व्याहतशब्दटीकायां भरतः ॥

यावत्, व्य, (यद् + डावतुः ।) साकल्यम् । अवधिः । मानम् । अवधारणम् । इत्यमरः । ३ । ३ । २४५ ॥ "साकल्ये निरवशेषे । यथा । यावद्दत्तं तावद्भुक्तं । अवधौ मर्य्यादायाम् । मूलात् शाखां यावत् प्रकाण्डः ॥ मानं प्रमा-णम् । यावद्दृष्टानि तावन्ति श्चत्वः ॥ अवधारण-मियत्तापरिच्छेदः । इयतो भाव इयत्ता परि-माणं तस्य परिच्छेदो निश्चयः । यथा यावत् पात्रं तावद्ब्राह्मणानामन्त्रयस्व । यावत्तावत् च साकल्ये-ऽवधारणे प्रशंसायां परिच्छेदे मानाधिकार-सम्भ्रमे पक्षान्तरे चेति मेदिनी ।" इति भरतः ॥ (यत्परिमाणमस्य इत्यर्थे । यत् + "यत्तदेतेभ्यः परिमाणे वतुप् ।" ५ । २ । ३९ । इति वतुप् । "आसर्व्वनाम्नः ।" ६ । ३ । ९१ । इत्यात्वम् ।) यत्परिमिते, त्रि । तत्र यावान् यावती यावत् इति रूपत्रयं भवति । यच्छब्दात् निपातनाद्वतु-प्रत्ययनिष्पन्नः । इति तद्धितपादे वोपदेवः ॥ (यथा, भागवते । २ । ९ । ३१ ।
"यावानहं यथा भावो यद्रूपगुणकर्म्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥"
यथाच मनुः । ८ । १५५ ।
"यावती सम्भवेद्वृद्धिस्तावतीं दातुमर्हसि ॥"
तथाच याज्ञवल्क्यः । २ । २६४ ।
"यावत् शस्यं विनश्येत्तु तावत् स्यात् क्षेत्रिणः
फलम् ॥")

यावतिथः, त्रि, (यावतां पूरणः । यावत् + "तस्य पूरणे डट् ।" ५।२।४८। इति डट् । "वतोरि-थुक् ।"५।२।५३। इति इथुगागमश्च ।) यावत्परि-माणम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनुः । १ । २० ।
"आद्याद्यस्य गुणन्त्वेषामवाप्नोति परः परः ।
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः ॥")